# Vatuka Upanishad

# વટુકોપનિષત્

## Document Information

Text title : vaTukopaniShat

File name : vaTukopaniShat.itx

Category : upanishhat, shiva, upanishad

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : Sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 20, 2020

*sanskritdocuments.org*

# વટુકોપનિષત્

અથ વટુકોપનિષદં વ્યાખ્યાસ્યામઃ ।
વાલાગ્રમાત્રં હૃદયસ્ય મધ્યે વિશ્વં દેવ જાતરૂપં વરેણ્યમ્ ।
તમાત્મસ્થં યેઽનુપશ્યન્તિ ધીરાસ્તેષાં શાન્તિર્ભવિતા નેતરેષાં
યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ બ્રહ્મા તસ્મૈ વૈ નમો નમઃ ।
યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ વિષ્ણુસ્તસ્મૈ વૈ નમો નમઃ ॥

યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ રુદ્રસ્તસ્મૈ વૈ નમો નમઃ ।
યો વૈ વટુકઃ સ ભગવાન્ યશ્ચેન્દ્રસ્તસ્મૈ વૈ નમો નમઃ ॥

યો વૈ વટુકઃ સ ભગવાન્ યશ્ચાગ્નિસ્તસ્મૈ વૈ નમો નમઃ ।
યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ વાયુસ્તસ્મૈ વૈ નમો નમઃ ॥

યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ સૂર્યસ્તસ્મૈ વૈ નમો નમઃ ।
યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ સોમસ્તસ્મૈ વૈ નમો નમઃ ॥

યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ ગ્રહાસ્તસ્મૈ વૈ નમો નમઃ ।
યો વૈ વટુકઃ સ ભગવાન્ યશ્ચોપગ્રહાસ્તસ્મૈ વૈ નમો નમઃ ॥

યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ ભૂસ્તસ્મૈ વૈ નમો નમઃ ।
યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ ભુવસ્તસ્મૈ વૈ નમો નમઃ ॥

યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ સ્વસ્તસ્મૈ વૈ નમો નમઃ ।
યો વૈ વટુકઃ સ ભગવાન્ યશ્ચાન્તરિક્ષં તસ્મૈ વૈ નમો નમઃ ।
યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ દ્યૌસ્તસ્મૈ વૈ નમો નમઃ ।
યો વૈ વટુકઃ સ ભગવાન્ યશ્ચાપસ્તસ્મૈ વૈ નમો નમઃ ॥

યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ તેજસ્તસ્મૈ વૈ નમો નમઃ ।
યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ કાલસ્તસ્મૈ વૈ નમો નમઃ ॥

યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ મૃત્યુસ્તસ્મૈ વૈ નમો નમઃ ।
યો વૈ વટુકઃ સ ભગવાન્ યશ્ચામૃત્યુસ્તસ્મૈ વૈ નમો નમઃ ॥

યો વૈ વટુકઃ સ ભગવાન્ યશ્ચાકાશસ્તસ્મૈ વૈ નમો નમઃ ।
યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ વિશ્વં તસ્મૈ વૈ નમો નમઃ ॥

યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ શુક્લં તસ્મૈ વૈ નમો નમઃ ।
યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ દમ્ભસ્તસ્મૈ વૈ નમો નમઃ ॥

યો વૈ વટુક સ ભગવાન્ યશ્ચાદમ્ભસ્તસ્મૈ વૈ નમો નમઃ ।
યો વૈ વટુકઃ સ ભગવાત્ યશ્ચ સૂક્ષ્મં તસ્મૈ વૈ નમો નમઃ ॥

યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ સ્થૂલં તસ્મૈ વૈ નમો નમઃ ।
યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ કૃષ્ણસ્તસ્મૈ વૈ નમો નમઃ ॥

યો વૈ વટુકઃ સ ભગવાન્ યશ્ચાકૃષ્ણસ્તસ્મૈ વૈ નમો નમઃ ।
યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ સત્યં તસ્મૈ વૈ નમો નમઃ ।
યો વૈ વટુકઃ સ ભગવાન્ યશ્ચ સર્વં તસ્મૈ વૈ નમો નમઃ ॥

ભૂસ્તે આદિર્મધ્યં ભુવઃ સ્વસ્તે શીર્ષં વિશ્વરૂપોઽસિ બ્રહ્મૈકસ્ત્વં
દ્વિધા ત્રિધા બુદ્ધિસ્ત્વં શાન્તિસ્ત્વં પુષ્ટિસ્ત્વં હુતમહુતં
દત્તમદત્તં સર્વમસર્વં વિશ્વમવિશ્વં કૃતમકૃતં પરમપરં
પરાયણં ચ ત્વમ્ । અપામ સોમમમૃતા અભૂમાગન્મ જ્યોતિરવિદામ
દેવાન્ । કિં નૂનમસ્માન્કૃણવદરાતિઃ કિમુ ધૂર્તિરમૃતં મર્ત્યસ્ય ।
સોમસૂર્યપુરસ્તાત્ સૂક્ષ્મઃ પુરુષઃ । સર્વં જગદ્ધિતં વા એતદક્ષરં
પ્રાજાપત્યં સૂક્ષ્મં સૌમ્યં પુરુષં ગ્રાહ્યમગ્રાહ્યેણ ભાવં ભાવેન
સૌમ્યં સૌમ્યેન સૂક્ષ્મં સૂક્ષ્મેણ વાયવ્યં વાયવ્યેન ગ્રસતિ સ્વેન
તેજસા તસ્માદુપસહર્ત્રે મહાગ્રાસાય વૈ નમો નમઃ ॥

હૃદિસ્થા દેવતાઃ સર્વા હૃદિ પ્રાણાઃ પ્રતિષ્ઠિતાઃ ।
હૃદિ ત્વમસિ યો નિત્યં તિસ્રો માત્રાઃ પરસ્તુ સઃ ॥

તસ્યોત્તરતઃ શિરો દક્ષિણતઃ પાદૌ ય ઉત્તરતઃ સ ઓઙ્કારો ય
ઓઙ્કારઃ સ પ્રણવો યઃ પ્રણવઃ સ સર્વવ્યાપી યઃ સર્વવ્યાપી સોઽનન્તો
યોઽનન્તસ્તત્તારં યત્તારં તત્સૂક્ષ્મં યત્સુક્ષ્મં તચ્છુક્લં યચ્છુક્લં
તદ્વૈદ્યુતં યદ્વૈદ્યુતં તત્પરં બ્રહ્મ યત્પરં બ્રહ્મ સ એકો ય એકઃ
સ રુદ્રો યો રુદ્રઃ સ ઈશાનો ય ઈશાનઃ સ ભગવાન્ મહેશ્વરો યો ભગવાન્
મહેશ્વરઃ સ ભગવાન્ વટુકેશ્વરો યો ભગવાન્ વટુકેશ્વરઃ ॥

અથ કસ્માદુચ્યત ઓઙ્કારો યસ્માદુચ્ચાર્યમાણ એવ
પ્રાણાનૂર્ધ્વમુત્ક્રામયતિ તસ્માદુચ્યત ઓઙ્કારઃ । અથ કસ્માદુચ્યતે
પ્રણવો યસ્માદુચ્ચાર્યમાણ એવ ઋગ્યજુસ્સામાથર્વાઙ્ગિરસં બ્રહ્મ
બ્રાહ્મણેભ્યઃ પ્રણામયતિ નામયતિ ચ તસ્માદુચ્યતે પ્રણવઃ ।
અથ કસ્માદુચ્યતે સર્વવ્યાપી યસ્માદુચ્ચાર્યમાણ એવ સર્વાન્ લોકાન્
વ્યાપ્નોતિ સ્નેહો યથા પલલપિણ્ડમિવ શાન્તરૂપમોતપ્રોતમનુપ્રાપ્તો
વ્યતિષક્તશ્ચ તસ્માદુચ્યતે સર્વવ્યાપી । અથ કસ્માદુચ્યતેઽનન્તો
યસ્માદુચ્ચાર્યમાણ એવ તિર્યગૂર્ધ્વમધસ્તાચ્ચાસ્યાન્તો નોપલભ્યતે
તસ્માદુચ્યતેઽનન્તઃ । અથ કસ્માદુચ્યતે તારં યસ્માદુચ્ચાર્યમાણ
એવ ગર્ભજન્મવ્યાધિજરામરણસંસારમહાભયાત્તારયતિ ત્રાયતે ચ
તસ્માદુચ્યતે તારમ્ । અથ કસ્માદુચ્યતે સૂક્ષ્મં યસ્માદુચ્ચાર્યમાણ
એવ સૂક્ષ્મો ભૂત્વા શરીરાણ્યધિતિષ્ઠતિ સર્વાણિ ચાઙ્ગાન્યભિમૃશતિ
તસ્માદુચ્યતે સૂક્ષ્મમ્ । અથ કસ્માદુચ્યતે શુક્લં યસ્માદુચ્ચાર્યમાણ
તવ ક્લન્દતે ક્લામયતિ ચ તસ્માદુચ્યતે શુક્લમ્ । અથ કસ્માદુચ્યતે
વૈદ્યુતં યસ્માદુચ્ચાર્યમાણ એવાવ્યક્તે મહતિ તમસિ દ્યોતયતિ
તસ્માદુચ્યતે વૈદ્યુતમ્ । અથ કસ્માદુચ્યતે પરં બ્રહ્મ યસ્માત્
પરમપરં પરાયણં ચ બૃહદ્બૃહત્યા બૃંહયતિ તસ્માદુચ્યતે
પરં બ્રહ્મ । અથ કસ્માદુચ્યત એકો યઃ સર્વાન્ પ્રાણાન્ સમ્ભક્ષ્ય
સમ્ભક્ષણેનાજઃ સંસૃજતિ વિસૃજતિ તીર્થમેકે વ્રજન્તિ તીર્થમેકે
દક્ષિણાઃ પ્રત્યઞ્ચ ઉદઞ્ચ પ્રાઞ્ચોઽભિવ્રજન્ત્યેક તેષાં સર્વેષામિહ
સદ્ગતિઃ । સાકં સ એકો ભૂતશ્ચરતિ પ્રજાનાં તસ્માદુચ્યત એકઃ ।
અથ કસ્માદુચ્યતે રુદ્રો યસ્માદૃષિભિર્નાન્યૈર્ભક્તૈર્દ્રુતમસ્ય
રૂપમુપલભ્યતે તસ્માદુચ્યતે રુદ્રઃ । અથ કસ્માદુચ્યત ઈશાનો
યઃ સર્વાન્ દેવાનીશત ઈશાનીભિર્જનનીભિશ્ચ પરમશક્તિભિઃ ।
અભિ ત્વા શૂર નોનુમોઽદુગ્ધા ઇવ ધેનવઃ । ઈશાનમસ્ય જગતઃ
સુવર્દૃશમીશાનમિન્દ્ર તસ્થુષઃ । તસ્માદુચ્યત ઈશાનઃ ।
અથ કસ્માદુચ્યતે ભગવાન્ મહેશ્વરો યસ્માદ્ભક્તા જ્ઞાનેન
ભજન્ત્યનુગૃહ્ણાતિ ચ વાચં સંસૃજતિ વિસૃજતિ ચ સર્વાન્ ભાવાન્
પરિત્યજ્યાત્મજ્ઞાનેન યોગૈશ્વર્યેણ મહતિ મહીયતે તસ્માદુચ્યતે
ભગવાન્ મહેશ્વરઃ । અથ કસ્માદુચ્યતે ભગવાન્ વટુકેશ્વરો
યસ્માદન્તર્જલૌષધિવીરુધાનાવિશ્યેમં વિશ્વં ભુવનાનિ વા અવતે
તસ્માદુચ્યતે ભગવાન્ વટુકેશ્વરઃ । તદેતદ્રુદ્રચરિતમ્ ॥

એકો હ દેવઃ પ્રદિશો નુ સર્વાઃ
પૂર્વો હ જાતઃ સ ઉ ગર્ભે અન્તઃ ।
સ એવ જાતઃ સ જનિષ્યમાણઃ
પ્રત્યઙ્જનાસ્તિષ્ઠતિ સર્વતોમુખઃ ॥

એકો વટુકો ન દ્વિતીયાય તસ્મૈ
ય ઇમાન્ લોકાનીશત ઈશનીભિઃ ।
પ્રત્યઙ્જનાસ્તિષ્ઠતિ સઞ્ચુકોચાન્તકાલે
સંસૃજ્ય વિશ્વા ભુવનાનિ ગોપ્તા ॥

યસ્મિન્ ક્રોધં યાં ચ તૃષ્ણાં ક્ષમાં ચ
હ્યક્ષમાં હિત્વા હેતુજાલસ્ય મૂલમ્ ।
બુદ્ધ્યા સઞ્ચિતં સ્થાપયિત્વા તુ રુદ્રે
શાશ્વત વૈ રુદ્રમેકત્વમાહુઃ ॥

વટુકો હિ શાશ્વતેન પુરાણેન
વેષમૂર્જેણ તપસા નિયન્તા ॥

અગ્નિરિતિ ભસ્મ વાયુરિતિ ભસ્મ જલમિતિ ભસ્મ સ્થલમિતિ ભસ્મ વ્યોમેતિ
ભસ્મ સર્વં હ વેદં ભસ્મ મન એતાનિ ચક્ષષિ યસ્માદ્વ્રતમિદં
પાશુપતં યદ્ભસ્મનાઙ્ગાનિ સંસ્પૃશેત્તસ્માદ્બ્રહ્મ તદેતદ્વટુકં
પશુપાશવિમોક્ષણાય ॥

યસ્મિન્નિદં સવર્મોતપ્રોતં
તસ્માદન્યન્ન પરં કિઞ્ચનાસ્તિ ।
ન તસ્માત્ પૂર્વં ન પરં તદસ્તિ
ન ભૂતં નોત ભવ્યં યદાસીત્ ॥

અક્ષરાજ્જાયતે કાલઃ કાલાદ્વ્યાપક ઉચ્યતે ।
વ્યાપકો હિ ભગવાન્ વટુકો ભોગાયમાનો યદા શેતે રુદ્રસ્તદા સંહરતે
પ્રજાઃ । ઉચ્છ્વાસિતે તમો ભવતિ તમસ આપોઽપ્સ્વઙ્ગુલ્યા મથિતે
મથિતં શિશિરે શિશિરં મથ્યમાનં ફેનં ભવતિ ફેનાદણ્ડં
ભવત્યણ્ડાદ્બ્રહ્મા ભવતિ બ્રહ્મણો વાયુર્વાયોરોઙ્કાર ઓઙ્કારાત્સાવિત્રી
સાવિત્ર્યા ગાયત્રી ગાયત્ર્યા લોકાઃ ભવન્તિ । એતદ્ધિ પરમં તપઃ । આપો
જ્યોતી રસોઽમૃતં બ્રહ્મ ભૂર્ભુવઃસ્વરોં નમ ઇતિ ॥

ય ઇમાં વટુકોપનિષદં બ્રાહ્મણોઽધીતેઽશ્રોત્રિયઃ શ્રોત્રિયો ભવતિ ।
અનુપનીત ઉપનીતો ભવતિ । સ હાગ્નિપૂતો ભવતિ । સ વાયુપૂતો
ભવતિ । સ સૂર્યપૂતો ભવતિ । સ સોમપૂતો ભવતિ । સ સત્યપૂતો
ભવતિ । સ સર્વપૂતો ભવતિ । સ સર્વૈર્દેવરૈનુજ્ઞાતો ભવતિ ।
સ સર્વૈર્વેદૈરનુધ્યાતો ભવતિ । સ સર્વેષુ તીર્થેષુ સ્નાતો ભવતિ ।
સ સર્વવિદ્ભવતિ । સ સર્વાયુરારોગ્યવાન્ ભવતિ । સ કાલજ્ઞાની ભવતિ ।
સ ગુર્વનુગ્રહભાગી ભવતિ । ઇત્યેવં ભગવદ્બટુકેશ્વરં યઃ સ્તૌતિ
સ વેદ્યં વેદેતિ ॥

(શૈવ-ઉપનિષદઃ)

ઇત્યાથર્વણરહસ્યે વટુકોપનિષત્ સમાપ્તા ।

Proofread by Kasturi navya sahiti

*Vatuka Upanishad*
pdf was typeset on March 20, 2020

Please send corrections to *sanskrit@cheerful.com*